जयतु संस्कृतम् ।। श्रीराधागोविन्दाभ्यां नमः ।। जयतु भारतम्

# सुलभ-ज्योतिष-मार्तण्डः



## पञ्चाङ्गम् (ALMANAC)



चतुरंगबलो राजा जगतीं वशमानयेत्।
अहं पञ्चाङ्गबलवानाकाशं वशमानये॥
भारतीयकुण्डलीविज्ञानम्, श्लोकः १

## पञ्चाङ्गम् (ALMANAC)

तिथिर्वासरनक्षत्रे योगः करणमेव च।
इति पञ्चाङ्गमाख्यातं व्रतपर्वनिर्दशकम्॥
भारतीयकुण्डलीविज्ञानम्, श्लोकः २

पञ्च + अङ्ग अर्थात् पञ्चानां अङ्गानां समाहारः इति पञ्चाङ्गम्॥

पयार्यवाचिनः - जंत्री, तिथि, पत्रा, पत्रक, ऍफेमरीज, केलेण्डर इत्यादयः ।

### तिथिः (TITHI)

सूर्यचन्द्रौ परस्परं यदा द्वादशांश (१२°) तुल्यान्तरे भवतः तदा एका तिथिः भवति। एक चान्द्रं दिनं एव तिथिः। तिथयः पञ्चदशः भवन्ति।
१. प्रतिपदा २. द्वितीया ३. तृतीया ४. चतुर्थी
५. पञ्चमी ६. षष्ठी ७. सप्तमी ८. अष्टमी
९. नवमी १०. दशमी ११. एकादशी १२. द्वादशी
१३. त्रयोदशी १४. चतुर्दशी १५. पूर्णिमा अमावस्या वा।

### वासरः (DAY)

दिनानि सप्त सन्ति। तेषां नामानि सन्ति-
१. रविवासरः सूर्यवासरः भानुवासरः आदित्यवासरः वा।
२. सोमवासरः चन्द्रवासरः इन्दुवासरः वा।
३. मंगलवासरः भौमवासरः कुजवासरः वा।
४. बुधवासरः सौम्यवासरः वा।
५. गुरुवासरः बृहस्पतिवासरः वा।
६. शुक्रवासरः भृगुवासरः सितवासरः वा।
७. शनिवासरः मन्दवासरः वा।

### नक्षत्रम् (NAKSHATRA)

सप्तविंशतिनक्षत्राणां नामानि सन्ति -
१. अश्विनी २. भरणी ३. कृत्तिका ४. रोहिणी
५. मृगशिरा ६. आर्द्रा ७. पुनर्वसुः ८. पुष्यम्
९. आश्लेषा १०. मघा ११. पूर्वाफाल्गुनी
१२. उत्तराफाल्गुनी १३. हस्तः १४. चित्रा
१५. स्वाती १६. विशाखा १७. अनुराधा
१८. ज्येष्ठा १९. मूलम् २०. पूर्वाषाढः
२१. उत्तराषाढः २२. श्रवणा २३. धनिष्ठा
२४. शतभिषक् २५. पूर्वाभाद्रपद्
२६. उत्तराभाद्रपद् २७. रेवति।

अभिजिन्नक्षत्रम् - उत्तराषाढनक्षस्य चतुर्थपादः श्रवणनक्षत्रस्य प्रथमः पंचदशांशः मिलित्वा अभिजिन्नक्षत्रस्य मानं भवति।

### योगः (YOGA)

सूर्यचन्द्रयोः गतियोगेन विष्कम्भादियोगाः २७ योगाः भवन्ति। एतेषामाधारौ सूर्यचन्द्रौ वर्तेते।
१. विष्कम्भः २. प्रीतिः ३. आयुष्मान् ४. सौभाग्यः
५. शोभनः ६. अतिगण्डः ७. सुकर्मा ८. धृतिः
९. शूलः १०. गण्डः ११. वृद्धिः १२. ध्रुवः
१३. व्याघातः १४. हर्षणः १५. वज्रः
१६. सिद्धिः १७. व्यतीपातः १८. वरीयान्
१९. परिघः २०. शिवः २१. सिद्धः २२. साध्यः
२३. शुभः २४. शुक्लः २५ ब्रह्म २६. ऐन्द्रः
२७. वैधृतिः

### करणम् (KARANA)

बवादीनि सप्त चलकरणानि भवन्ति। चलकरणस्य आरम्भः शुक्लपक्षस्य प्रतिपत्तिथेः उत्तरार्धतः भवति। यथा -१. बवः २. बालवः ३. कौलवः ४. तैतिलः ५. गरः ६. वणिजः ७. विष्टिश्च।
चत्वारि स्थिरकरणानि क्रमशः १. शकुनिः २. नागः ३. चतुष्पद् ४. किंस्तुघ्नकरणम्।
स्थिरकरणस्य आरम्भः कृष्णचतुर्दश्याः उत्तरार्धे, अमायाः पूर्वार्धे, अमाया उत्तरार्धे किंच शुक्लपक्षस्य पूर्वार्धे एव भवन्ति।

---

नन्दा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः।
सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः।।
मुहूर्तचिन्तामणीः, १/४

अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः।
आर्द्रा पुनर्वसू पुष्यस्तथाश्लेषा मघा ततः।।
पूर्वाफाल्गुनिका चैव उत्तराफाल्गुनी ततः।
हस्तचित्रा तथा स्वाती विशाखा तदनन्तरम्।
अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते।
पूर्वाषाढोत्तराषाढा त्वभिजिच्छ्रवणा ततः।।
घनिष्ठा शततारारव्यं पूर्वाभाद्रपदा ततः।
उत्तराभाद्रपदा चैव रेवत्येतानि भानि च।। भारतीयज्योतिषम्, पृष्ठः १२०

विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च।।
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा।
वज्रः सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः।
साध्यः सिद्धः शुभः शुक्लो ब्रह्मेन्द्रौ वैधृतिस्तथा।।
भारतीयज्योतिषम्, पृष्ठः १२२

बवबालवकौलवतैतिलगरवणिजविष्टयः सप्त।
शकुनि चतुष्पदनागकिंस्तुघ्नानि ध्रुवाणि करणानि।।
बवबालवकौलव-तैतिलगरवणिजविष्टिसंज्ञानाम्।
पतयः स्युरिन्द्रकमलजमित्रार्यमभूश्रियः सयमाः।।
कृष्णचतुर्दश्यन्तार्द्धादध्रुवाणि शकुनिचतुष्पदनागाः।
किंस्तुघ्नमथ च तेषां कलिवृषफणिमारुताः पतयः।।
भारतीयज्योतिषम्, पृष्ठः १२३

डॉ. मनोजश्रीमालः, सहायकाचार्यः (ज्योतिषविभागः), केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला। दूरभाषः 8894646447

Shrimal Arts